Journal of Advances and Scholarly Researches in Allied Education
Vol. 16, Issue No. 2, February-2019, ISSN 2230-7540

# मत्स्यप्रदेशस्य परिचयात्मकमनुशीलनम्

**Ramanarayan Sharma***

Research Scholar, Central Sanskrit University, Janakpuri, New Delhi

***सारांश:*** *– मत्स्यप्रदेशः द्वयोःशब्दयोः योगेन निष्पन्नः मत्स्य- प्रदेशश्चेति। अस्य प्रदेशस्य गणना मौर्यसाम्राज्यस्य तत्कालीनेषु षोडशमहाजनपदेषु क्रियते स्म। तदानीं जनपदोऽयं सर्वसमृद्धः वैभवसम्पन्नश्चासीत्। अस्य अस्तित्वं प्रागैतिहासिककालस्य आदिमानवेन सह संलग्नमस्ति। अत्र खननक्रियया लब्धाभिः पुरातत्वसामग्रीभिः शैलाश्रयैश्च सार्धैकलक्षवर्षप्राक् कालीनानामुपकरणानां शैलचित्राणाधारेण प्रमाणितमिदं यत् मानवसभ्यताया उद्भवविकासे मत्स्यप्रदेशस्य योगदानं महत्वपूर्णमस्ति।*

---------------------------------X---------------------------------

प्रदेशस्यास्य पुरातात्विकदृष्ट्या सांस्कृतिकदृष्ट्या च अत्यधिकं महत्त्वमस्ति।आदिमानवानां शैलसभ्यताः लब्धावशेषैः तत्थ्यमिदम् इतोऽपि प्रमाणितं यत् लक्षादिकवर्षेभ्यः पूर्वमपि प्रदेशोऽयं विकसितदशायामासीत्। पुरातत्वविद्भिः अस्य क्षेत्रा/ले भानगढः, ढिगारिया, गॉवड़ी-गणेश्वर जोधपुरा विराटनगरेभ्य पाषाणकालिनावशैषाः लब्धाः यैः प्रमाणितं भवतियत् आदिमानवस्य सभ्यतायाः विकासक्रमे मत्स्यप्रदेशः अग्रणी आसीत्। अयं प्रदेशः आदिकालादेव भारतीयसभ्यतायाः संस्कृतेश्च नभोमण्डले दैदीप्यमानो वर्तते। मानवसभ्यतां संस्कृति/ पोषयितुं वर्धयितुं चास्य प्रदेशस्य अवदानमविस्मरणीयं वर्तते।

"मत्स्य-प्रदेशः" इति शब्दस्य उत्तरपदं कालक्रमानुसारं परिवर्तमानं वर्तते। कदाचित् एतस्य कृते जनपदः, कदाचित् महाजनपदः, कदाचित् सल्, कदाचिच्च प्रदेशः इति सम्बोध्यते व्यवहृयते च।

मत्स्य-प्रदेशस्य नामकरणेतिहासः भगवतो विष्णोः मत्स्यावतारेण सह संयुक्तो वर्तते। यथा आदिमानवस्य पाषाणकालीनायाः शैलसभ्यतायाः विकासक्रमे अत्रत्य भौगोलिकस्य परिवेशस्य सहयोगः आसीत्।

तथैव अत्र उपलब्धायाः ताम्रसम्पदः विपुलै भण्डारै अस्याः सभ्यतायाः विकासे स्वस्य महत्वपूर्णा सहायताऽपि प्रदत्ता। उत्खननसर्वेक्षणयो अत्र प्रचुरमात्रायां ताम्रोपकरणानि मृत्पात्राणि अन्यमहत्वपूर्णसामग्रयश्च लब्धाः। "येषामध्ययनेदंप्रमाणितं यत् प्रदेशोऽयं ताम्रसभ्यताया अत्यन्तं विकसितं महत्वपूर्ण/चकेन्द्रमासीत्।[1]

तदानीं सर्वस्मिन् क्षेत्रेऽस्मिन् नैकेः खनयः उपलब्धाः आसन्। मत्स्यप्रदेशस्य गणेश्वर- नाम्नि- स्थाने उत्खनेन पाषाणयुगस्य उत्तराधिकारिणी ताम्रपाषाणकालीना संस्कृतिः प्रकाशे आगताएव/त्रलब्धासु सामग्रीषु नवनवतिः प्रतिशतं ताम्रधातुः प्राप्तः। अलवरेति मण्डलान्तर्गते खो-दरीबा इत्यस्थाने अत्यधिकमात्रायां ताम्रं लब्धम्।

गणेश्वरस्य पुरातात्विकखननस्य समीपवर्तिनः क्षेत्रस्य व्यापक सर्वेक्षणस्यचाधारेण नैकानि साक्ष्याणि प्राप्तानि, यानि भारते ताम्रयुगीन-सभ्यतायाः उत्पति-विकास-प्रसार-सदृशजटिल-समस्याः प्रकाशयन्ति। रेडियो कार्बनविधिना तुलनात्मकाध्ययनस्यचाधारेण अस्य कालः 2800 वर्ष ईसा पूर्वः निर्धारितः। ताम्रयुगीन- सांस्कृतिक केन्द्रेभ्यः लब्ध-कालेषु अयं प्राचीनतमः।

इत्थं गणेश्वरसंस्कृतिःनिर्विवादरूपेणभारते ताम्रयुगीनसभ्यतायाःजननी मन्यते। विश्व-प्रसिद्धस्य "खेतड़ी" इति ताम्रभण्डारमध्ये स्थितत्वात् मान्यतेयं इतोऽपि समर्थिता। विविधनदीघाटीसभ्यताभि प्राचीनस्थलानां स्थितिभिः निकर्षोऽयं प्राप्तः "यत् हड़प्पा-मोहनजोदड़ो-कालीबंगा-सदृश विकसित- सांस्कृतिक केन्द्राण्यपि ताम्रसामग्रीश्च गणेश्वरपरिसरादेव प्राप्नुवन्ति स्म"[2]

मत्स्य-क्षेत्रे ताम्रसभ्यता अत्यन्तं विकसिता उन्नता चासीत्। क्षेत्रेऽस्मिन् प्रचुरमात्रायां ताम्रशराणाम् उत्पादनं भवति स्म। येनजनाः न केवलं स्वावश्यकतां पूरयन्तिस्म अपितु अन्यत्रापि प्रेषयन्ति स्म। अत्रत्य निर्मितानां बाणानां विविधां तकनीकीमवलोक्य इत्थं प्रतीयते यत् अस्य

www.ignited.in

प्रदेशस्य निवासिनः मृगयायामतीव निपुणाः आसन्। एषु केचन् बाणातु अतीव विशिष्टा आसन् यथा एकेनैव बाणेन नैकबारं मृगया कत्र्तुं शक्यते स्म।

एतदरिक्तं कुठाराःभल्लाःशक्तयः छुरिकादयश्चानेकानि उपकरणानि तथ्यमिदं प्रमाणयन्ति यत् अस्मिन् क्षेत्रे नैकंम हिंसकपशुपक्षिणामस्तित्वमासीत्। मस्त्यसंग्राहकोपकरणानां प्राप्ति एतत् संकेतयति यत् मत्स्यानामाखेटं भवति स्म।

अस्मिन् क्षेत्रे लब्धानि मत्स्यग्राहककण्टकानि वलयादीनि च "मोहनजोदड़ो" इत्यस्यसमकालीनानि मन्यन्ते। अत्र लब्धानि अन्यान्युपकरणान्यथा कुठाराः बाणाग्रभागा शक्त्यादीनि सिन्धुघाटीसभ्यतायाः प्राक्कालीनानि स्वीकृतानि।

"सभ्यतेयं 4500 वर्षप्राक्कालीनानुमिता तत्रः तेन उक्तं यत् इयं सभ्यता हड़प्पा सभ्यतायाः अपि प्राग्वर्तिनी वर्तते"।

"बागौर" इति क्षेत्राल्लब्धानां बाणानां तुलनात्मकमध्ययनंविधाय श्री आर.सी. अग्रवालमहोदयेन अत्रत्य सभ्यता बागौरसमकालीना मता।

डॉ. डी.पी. अग्रवाल महादेयनापि अस्याः सभ्यतायाः अस्तित्वं हड़प्पासभ्यतायाः पूर्वं स्वीकृतं तथा च मोहनजोदड़ो-कालीबंगा इत्यादि क्षेत्राणां कृते उपकरणानि मत्स्य-प्रदेशस्य "शेखावाटी" इति क्षैत्रात् आयातितानि स्वीकृतानि। उपर्युक्तानां पुराविदां कथनानुसारं निष्कर्षोऽयं प्राप्यते यत् मत्स्य क्षेत्रस्य सभ्यतायाः विकासः निश्चयेन हड़प्पासभ्यताया पूर्वमभवत्।

**"मत्स्यप्रदेशान्तर्गतं विराटनगरस्यपरिवर्णनम्"**

पौराणिककालादेव विराटनगरस्य भोगोलिकपरिक्षेत्रमिदं पुराकालिकतीर्थनगररूपेण जगतिख्यातं वर्तते। भगवत्याः सत्याः दक्षिणपादागुलिभिः पूतमिदं "एकचत्वारिंशतमशक्तिपीठरूपेण प्रसिद्धमस्ति"[3] सुधीभिः भक्तवरेण्यैः मातुः अत्रत्य स्वरूपं अम्बिकेति भैरवस्वरूपं च अमृतेति निगद्यते।

चन्द्रवंशोद्भवस्य मत्सिलेति नामधेयस्य नृपस्य मत्ससेनः वनसेनश्च द्वौ पुत्रौ आस्ताम्। ययो मत्ससेनः स्व मातामहस्य कलिग्देशेति राज्यस्य वनसेनश्च (वेणुः) मत्स्यदेशस्य राजा बभूब (अभूत्)। वनसेनस्य ज्येष्ठपुत्रः विराटः प्राचीनायाः मत्स्यपुर्याः पत्रिंशत् किमी पश्चिमायांदिशि अरावलीपर्वता/ले स्वनाम्ना विराटनगरं संस्थापयामास तथा च स्व राजधानीं चकार। एतदेव विराटनगरं वैराट-बैराठ् वैराड़ा इत्यादिभिःनामभिः व्यवहृयते।

"जयपुरमण्डलस्य विराटनगरम् (बैराठ) इतिक्षेत्रं शैलाश्रयैः पुरातात्विकदृष्ट्या च सुविदितं सर्वैः। साबीनद्या पूर्वतटे महाभारतकालीनस्य "मत्स्य" इति नामधेयस्य राज्यस्य राजस्थल्याः समीकरणं अस्मादेव पुरास्थलात् कृतं वर्तते"।(4)

मत्स्यप्रदेशस्य राजधानीरूपेण ख्यातं विराटनगरम् आदि-मानव-सभ्यतायाः विकासक्रमे प्रमुखं केन्द्रं वर्तते। अत्र "सार्धैक लक्षवर्षेभ्यः चतुःसहस्रवर्षपर्यन्त-कालस्य" (150000तः ई.पू. 2000 वर्षाणि) उपकरणानि शैलचित्राणि च पुराविद्भिः लब्धानि। सर्वप्रथमं पाषाणकालीन-सभ्यतायाः साक्षं डॉ.एन.आर.बनर्जी महोदयेन कृतखननक्रमे (1962-63 प्राप्तम्। द्वितीय साक्ष्य रूपेण डॉ. सुन्दरराजन-महोदयेन क्षेत्रेऽस्मिन अष्टादश-संख्याकानि प्रस्तर-निर्मितानि अस्त्राणि शस्त्राणि प्राप्तानि।

"विराटनगरे पूर्वपाषाणकालतः उत्तरपाषाणकाल-पर्यन्तं मानवसभ्यता विकसिता आसीत्। अत्र लक्ष्यादिकवर्षेभ्योऽपि अधिक-वर्ष-पुरातन-प्रस्तराणाम् उपकरणानि अन्वेष्टृभिः स्वान्वेषणे लब्धानि। "डॉ. सुन्दरराजन-महोदयेन पूर्वपाषाणकालस्य हस्तकुठारः उभयतः तीक्ष्णाग्रयुक्त पाषाणशस्त्राणि च लब्धानि"[5]

डॉ. सुन्दरराजन-महोदयः विराटनगरे सम्प्राप्तानाम् उत्तरपाषाणकालीनोपकरणानाम् उल्लेखंकुर्वन्अलिखत् यत् अस्यक्षेत्रस्य पाषाणकालीन-सभ्यता अत्यन्तम् उन्नतकोट्याः आसीत्। अत्र पाषाण निर्मितोपकरणानां विशालोपक्रमः आसीत्। इत्थं राजस्थानस्य "भीलवाड़ा"इति मण्डलान्तर्गते बागौर इतिग्रामे निदेशकेन डॉ. रतनचन्द-अग्रवालेन प्रचुरमात्रायां उत्तरपाषाणकालीनस्य पाषाणनिर्मितानि उपकरणानि अन्विष्टानि। धनोप-थाना एव/ बाड़मेर-मण्डले पाषाणोपकरणानि प्राप्तानि सन्ति। एवमेव आहड़ क्षेत्रे (उदयपुरे) अपि पाषाणनिर्मितानि ताम्रनिर्मितानि उपकरणानि च अधिगतानि। किन्तु समस्त प्राप्तोपकरणानां तुलनात्मक- दृष्टया मीमांसया ज्ञायतेयत् यद्यपि आहड़ बागौरादिक्षेत्रेषु पाषाण- उपकरणानि प्राप्तानि सन्ति परन्तु विराटनगरे यानिउपकरणानि लब्धानि तानि लक्ष्यादिकवर्षेभ्यः प्राक्कालीनानि पूर्वपाषाणकालीनानि

मध्यपाषाणकालीनानि च लब्धानि यानि प्रमाणयन्ति यत् विराटनगरम् इति महत् क्षेत्रं पाषाणकालीनायाः आदिमानवसभ्यतायाः उद्भवस्थलं प्रमुखस्थलं च वर्तते।

विराटनगरम् (बैराट) जयपुरतः प्रायः अशीतिः किमी अभ्यन्तरे वर्तते। एतस्य प्राचीनंनाम विराटपुरम् अपि मिलति। एतत् मत्स्यदेशस्य राजधानी आसीत्।

www.ignited.in

अस्य भौगोलिक-स्थिति पूर्वतः पश्चिमां यावत् प/मील परिमाणात्मिका तथा च उत्तरतः दक्षिणां 3-4 मील परिमाणत्मिका आसीत्। एतद्नगरं परितः बीजक-पर्वतिका, भीमसेन-पर्वतिका, (गणेशगिरि) महादेव पर्वतिका चेत्यादीनि महत् स्थलानि सन्ति। यद्यपि एतानि स्थलानि मौर्यकालीनानि अथवा इतोपि प्राक्कालीनानि प्रतीयन्ते परन्तु "केषांति कोढ़िफलकादिनां येषाम् अत्र खननेन प्राप्तिरभवत् तेषां परिमार्गणेन अनुमीयते यत्क्षेत्रमिदं सिन्धुघाटी क्षेत्रस्य समकालीनं वर्तते"।[6]

विराटनगरं पुरातात्विकम् ऐतिहासिकं महाभारतकालीन-प्राचीन-सभ्यतानां संस्कृतीनां च केन्द्रं पुरातत्वस्य स्मारकं बिन्दु वर्तते। नगरमिदं दुर्गाकार-अरावली पर्वत-श्रृखंलाभिः आवृत्तं सुरक्षित। पर्वत-श्रृखंलाः अन्तराः नानाप्राग्गाथाः पठन् स्व-पौराणिक-वैभव समुच्चयं सङ्गृहनन् वर्तते। अत्र दीर्घाकाराः कन्दरा याः जीवान् गोपयितुं सर्मथा सन्ति ताः भीमगुफा, बलदेवगुफा इत्यादिनामभिः व्यवहयन्ते। अत्र विद्यमाना पर्वतिकाऽपि "पाण्डव पहाड़" भीमसेन- पहाड़ी इति नामभिः उच्चार्यन्ते इति सर्वविदितमेव।

विराटनगरस्य समृद्धिः वैभव/ आध्यात्मिक-शान्ति- प्राप्तये चिन्तनस्य आधारः सजतः। एवं पाण्डवाः अपि अत्र अध्यात्मिकीं शान्तिंप्राप्तुं धर्मात्मनः महाराज-विराटस्य सेवां कुर्वन् अत्र एकवर्षात्मकं स्वाज्ञातवासं कालं यापयितुं दृढं सटल्पितवन्तः।

**"यथा विराटनगरे तव पूर्व पितामहाः।**

**अज्ञातवासमुषितास्तछृणुस्व नराधिप।।**

**मत्स्यो विराटो बलवानभिरत्तोऽथ पाण्डवान्।**

**धर्मशीलो वदान्यश्च वृद्धश्च सततं प्रिय।।**

**विराटनगरे तात सम्वत्सरमिमं वयम्।**

**कुर्वन्तस्तस्य कर्माणि विहरिष्याम भारत।।**[7]

श्री चिन्तामणि इतिउपनामधेयस्य विनायकः वैद्यति महोदयस्य कथनानुसारं पाण्डवानां विराटनगर-यात्रायाः मार्गः इत्थमनुमीयते- कुरूक्षेत्रस्य दक्षिणतः शूरसेन-देशः वर्तते, अस्य राजधानी च यमुनातटे स्थिता मथुरानगरी लोकप्रसिद्धा एव अस्ति। अस्याः 'मथुरा' इति नगर्याः पश्चिमतः मत्स्यदेशः आसीत् यः जयपुरतः उत्तरभागे स्थितः आसीत्। यदा पाण्डवाः अज्ञातवासाय निर्गताः तदा ते गंगतटात् नैऋत्य दिशां प्रतिगताः अग्रे चलित्वा ते यमुनायाः दक्षिण-तटस्य पर्वतान् अरण्यं च लल्यित्वा पाल- देशस्य दक्षिणतः दशार्ण-देशस्य उत्तरतः स्थितयोश्च यकृत् लोम-शूरसेन-देशयोः मृगयामाचरन् "वयं व्याधाःस्म" इति उच्चारयन् च विराटदेशम् प्रति आगताः।

महाभारतकाले विराटनगरस्य उत्कर्षमद्भुतम् आसीत्। पाण्डवाः सहयोगिभूतस्य महाराज-विराटस्य सन्निधौ एकवर्षात्मकम् अज्ञातवासकालं यापितवन्तः। अत्रैव कीचकवधः कौरवैःगौर्हरणं त्रिगर्तैः सहयुद्धं, अर्जुनकौरवयुद्धं, पाण्डवानां प्रकाशनम् उत्तरायाम् अभिमन्युना सह पाणिग्रहण-संस्कारः कुरूक्षेत्रस्य युद्धाय सजतः। श्रीकृष्णस्य कौरवेभ्यः सन्धि-प्रस्तावं चेत्यादिभि ऐतिहासिकैः प्रसगैः विराटनगरस्य महत्त्वम् उत्तरोत्तरं वर्द्धमानं वर्तते। एतदेव विराटनगरं लक्ष्यीकृत्य, अस्य वैभवं महाराज-विराटस्य चरित्रं च लक्ष्ययन् महाभारतस्य रचनाकारः श्रीकृष्ण-द्वैपायन-व्यासः विराट-सम्बन्धिनः एकस्यपर्वणः नाम विराटपर्व इति चकार।

महाराज-विराटस्य गणना महद् योद्धषु क्रियते, अतएव योगयोगेश्वरो भगवान् श्रीकृष्णः श्रीमद्भगवद्गीतायां महाराजविराटं पालनरेशद्रुपदेनसमो महारथी इति कथयामास।

**अत्र शूराः महेष्वासाःभीमार्जुन समा युधि,**

**युयुधानो विराटश्च द्रुपदश्च महारथः।**

**धृष्टकेतुश्चेकितानःकाशिराजश्चवीर्यवान्।**

**पुरूजित्कुन्ति-भोजश्च शैव्यश्च नरपुग्व।।**

**युधामन्युश्चविक्रान्त उत्तमौजाश्च वीर्यवान्।**

**सौभद्रौ द्रोपदेयाश्च सर्वएव महारथाः।।**

**काश्यश्च परमेष्वासः शिखण्डीय महारथः।**

**धृष्टधुम्नो विराटश्च सात्यकिश्चा पराजितः।।**

**द्रुपदौ द्रौपदेयाश्च सर्वशः पृथिवीपते।**

**सौभद्रश्च महाबाहुः शङ्खान् दध्मुः पृथक् पृथक्।।**

महाराजस्य विराटस्य पूर्णं सहयोगमवाप्य पाण्डवाः यदा उपलव्यनगरे निवासमकुर्वन् तदा ते स्व-पक्षं प्रस्तोतुं शान्त्या च स्वराज्यं पुनरधिगन्तुम् एकं वृहन् मित्र-राष्ट्र-सम्मेलनम् आयोजितवन्तः। सम्मेलनेऽस्मिन् मुख्यतः महाराजं विराटम्अतिरिच्यमहाराजो द्रुपदः, काशिनरेशः,

कैकयनरेशः, जयत्सेनः, शाल्वनरेशः, इन्द्रसेनः श्रीकृष्णः, बलरामः द्युष्टधुम्नादयश्चोपस्थिताः।

**पालराजस्य समीपतस्तु शिनिप्रवीरः सहरोहिणेयः।**

**मत्स्यस्य राज्ञस्तु संनिकृष्टे जनार्दनश्चैव युधिष्ठिरश्च।।8।।**

सहैवच पाण्डवानां कौरवेभ्यः राज्यम् अधिगन्तुम् औचित्यम् अपि प्राबल्येन उक्तम्। बलरामः अपि श्रीकृष्णं समर्थितवान् सात्यकिद्रुपद्राजभ्यामपि पाण्डवानां पक्ष एव प्रतिपादितः। इत्थं महाभारतस्य ऐतिहासिकस्य कुरूक्षेत्र-रणस्य रणनीतिः विराटनगरे एव निर्मिता। सम्मेलनेऽस्मिन महाराजस्य विराटस्य परिषदि विराटनगरे श्रीकृष्णेन पाण्डवाः धर्मनिष्ठाः मर्यादिताः सत्यवादिनश्च उक्ताः।

**सन्दर्भ:**


1. मत्स्य संघ का पुरातात्विक एवं सांस्कृतिक इतिहास- डॉ. सी एल शर्मा- पृ-30
2. तोरावाटी का इतिहास-डॉ.एम. पी. शर्मा पृ- 33
3. देवीपुराण (महाभागवत) शक्तिपीठाट पृष्ठ- संख्या 36-43
4. ए नोट ऑन पोलियोलिथिक साइटएट बैराठ इन राज.- के.एन.दीक्षित रिसर्चर 07.09.2026-1966-68जयपुर
5. आर्कियोलोजिकल रीमेन्स एण्ड एक्सवेशन एट् बैराट, जयपुर 1936 डॉ. डी.आर.साहनी
6. बैराट् आर्कियोलोजिकल रिपोर्ट
7. राज. के इतिहास के स्रोत-डॉ. गोपीनाथ शर्मा पेज.12
8. विराट पर्व अध्याय-1 -श्लोक 4--17-18)
9. भगवद्गीता प्रथम अघ्याय-श्लोक 4,5,6,
10. भीष्मपर्व पविशंतेऽध्याय



**Corresponding Author**

**Ramanarayan Sharma***

Research Scholar, Central Sanskrit University, Janakpuri, New Delhi


www.ignited.in